# श्रीस्तवावल्यां गौराङ्गस्तवकल्पतरुः

Version 0.1

## रघुनाथदासगोस्वामिरचितः

24 May 2000

श्रीगौराङ्गाय नमः

गतिं दृष्ट्वा यस्य प्रमदगजवर्येऽखिलजना
मुखञ्च श्रीचन्द्रोपरि दधति थुत्कारनिवहम् ।
स्वकान्त्या यः स्वर्णाचलमधरयच्छ्रीधु च वच-
स्तरङ्गैर्गौराङ्गो हृदय उदयन्मां मदयति ॥१ ॥

अलङ्कृत्यात्मानं नवविविधरत्नैरिव बल-
द्विवर्णत्वस्तम्भास्फुटवचनकम्पाश्रुपुलकैः ।
हसन् स्विद्यन्नृत्यन् शितिगिरिपतेर्निर्भरमुदे
पुरः श्रीगौराङ्गो हृदय उदयन्मां मदयति ॥२ ॥

रसोल्लासैस्तिर्यग्गतिभिरभितो वारिभिरलं
दृशोः सिञ्चल्लोकान्नरुणजलयन्त्रत्वमितयोः ।
मुदा दन्तैर्दष्ट्वा मधुरमधरं कम्पचलितै-
र्नटन् श्रीगौराङ्गो हृदय उदयन्मां मदयति ॥३ ॥

क्वचिन्मिश्रावासे व्रजपतिसुतस्योरुविरहात्
श्लथच्छ्रीसन्धित्वाद्दधदधिकदैर्घ्यं भुजपदोः ।
लुठन् भूमौ काक्वा विकलविकलं गद्गदवचा
रुदन् श्रीगौराङ्गो हृदय उदयन्मां मदयति ॥४ ॥

अनुद्घात्य द्वारत्रयमुरु च भित्तित्रयमहो
विलङ्घ्योच्चैः कालिङ्गिकसुरभिमध्ये निपतितः ।
तनूद्यत्सङ्कोचात् कमठ इव कृष्णोरुविरहात्
विराजन् गौराङ्गो हृदय उदयन्मां मदयति ॥५ ॥

स्वकीयस्य प्राणार्बुदसदृशगोष्ठस्य विरहात्
प्रलापानुन्मादात् सततमतिकुर्वन् विकलधीः ।
दधद्भित्तौ शश्वद्वदनविधुघर्षणेन रुधिरं
क्षतोत्थं गौराङ्गो हृदय उदयन्मां मदयति ॥६ ॥

क्व मे कान्तः कृष्णस्त्वरितमिह तं लोकय सखे

त्वमेवेति द्वाराधिपमभिदधन्नुन्मद इव ।
द्रुतं गच्छ द्रष्टुम् प्रियमिति तदुक्तेन धृतत-
द्भुजान्तो गौराङ्गो हृदय उदयन्मां मदयति ॥ ७ ॥

समीपे नीलाद्रेश्चटकगिरिराजस्य कलना-
दये गोष्ठे गोवर्धनगिरिपतिं लोकितुमितः ।
व्रजन्नस्मीत्युक्त्वा प्रमद इव धावन्नवधृतो
गणैः स्वैर्गौराङ्गो हृदय उदयन्मां मदयति ॥ ८ ॥

अलंदोलाखेलामहसि वरतन्मण्डपतले
स्वरूपेण स्वेनापरनिजगणेनापि मिलितः ।
स्वयं कुर्वन्नाम्नामतिमधुरगानं मुरभिदः
सरङ्गो गौराङ्गो हृदय उदयन्मां मदयति ॥ ९ ॥

दयां यो गोविन्दे गरुड इव लक्ष्मीपतिरलं
पुरीदेवे भक्तिं य इव गुरुवर्ये यदुवरः ।
स्वरूपे यः स्नेहं गिरिधर इव श्रीलसुबले
विधत्ते गौराङ्गो हृदय उदयन्मां मदयति ॥ १० ॥

महासम्पद्दारादपि पतितमुद्धृत्य कृपया
स्वरूपे यः स्वीये कुजनमपि मां न्यस्य मुदितः ।
उरोगुञ्जाहारं प्रियमपि च गोवर्धनशिलां
ददौ मे गौराङ्गो हृदय उदयन्मां मदयति ॥ ११ ॥

इति श्रीगौराङ्गोद्गतविविधसद्भावकुसुम-
प्रभाभ्राजत्पद्यावलिललितशाखं सुरतरुं ।
मुहुर्योऽतिश्रद्धौषधिवरबलत्पाठसलिलै-
रलं सिञ्चेद्विन्देत् सरसगुरुतल्लोकनफलम् ॥ १२ ॥

इति श्रीगौराङ्गस्तवकल्पतरुः सम्पूर्णः